**दिनाङ्क :- 04.07.2026**

**प्रात: - 06:55**

**<u>प्रधानमंत्री - राजस्थान - गुजरात यात्रा</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थान-गुजरात-राज्ययोः एकदिवसीय-यात्रायै प्रस्थास्यति। प्रधानमन्त्री सर्वप्रथमं राजस्थानस्य यात्रां करिष्यति, यत्र असौ अद्य प्रातःकाले जोधपुर-विमानपत्तनस्य नूतन टर्मिनल् इति भवनस्य उद्घाटनं करिष्यति। अशीत्यधिक-चतुश्शतकोटि-रूप्यकाणाम् इयं परियोजना वार्षिकं विंशतिलक्ष -यात्रिणः सञ्चालयितुं परिकल्पितम् अस्ति। असौ जोधपुरे संशोधित-उड्डयन- योजनायाः शुभारम्भोपि विधास्यति। अस्याः योजनायाः उद्देश्यं विमानन-आधारित- विकासस्य अग्रिम-चरणस्य गतिं वर्धयितुम् अस्ति। एतदनन्तरं, श्रीमोदी बालोतरा नगरस्य यात्रायां भविष्यति, यत्र असौ अद्य मध्याह्ने प्रायः षड्-सहस्राधिकैक-लक्ष कोटिरूप्यकाणां विकास-परियोजनानां लोकार्पणम्, उद्घाटनम् आधारशिलाञ्च स्थापयिष्यति। श्रीमोदी राजस्थानप्रशासनस्य विभिन्न-विभागेषु नियुक्तेभ्यः प्रायः चतुःपञ्चाशत्-युवकेभ्यः नियुक्तिपत्राण्यपि प्रदास्यति। अनन्तरं सायङ्काले, प्रधानमन्त्री मोदी गुजरातस्य यात्रां करिष्यति।

**<u>प्रशासनेन पुनरुद्घाटितं यत्</u>**

पाकिस्तान-देशात् सीमापारस्य भयोत्पादनस्य निरन्तर-प्रायोजकत्वस्य प्रतिक्रियारूपेण सिन्धु-जल-सन्धिः स्थगितः अस्ति। गतरात्रौ नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत्, सिन्धु-जल-सन्धि-विषये भारतस्य स्थितिः सुसङ्गतास्ति। सः अवदत् यत्, पाकिस्तान-देशः सीमापारस्य भयोत्पादनस्य समर्थनं विश्वसनीयरूपेण अपरिवर्तनीयरूपेण च त्यक्तव्यम्। तीस्ता-नद्याः समग्र-प्रबन्धन-पुनर्स्थापन-परियोजनायाः विषये श्रीजायसवालः बाङ्ग्लादेशस्य विकास-साहाय्यं प्रति भारतस्य दृष्टिम् अपि प्रकटितवान्।

**<u>अमित शाह</u>**

केन्द्रीय-गृह-मन्त्री अमित-शाहः, कृषि-कृषक-कल्याण-मन्त्री शिवराज्-सिंह-चौहानः च एल्-नीनो इत्यस्य कारणेन देशस्य केषुचित् भागेषु सामान्यात् न्यूनवृष्टेः, तस्य प्रभावस्य च स्थितिं समीक्षितवन्तौ। सभायां श्रीशाहः अवदत् यत्, एल्-नीनो इत्यस्य कारणेन देशस्य केषुचित् भागेषु सामान्यात् न्यूनवृष्टिं, सम्भावित-अनावृष्टेः स्थितिं च प्रशासनं निरन्तरं निरीक्ष्यमाणम् अस्ति।

**<u>दिल्ली एसआईआर</u>**

अद्यावधि सम्पूर्ण-राष्ट्रिय-राजधान्यां एकलक्षद्विसहस्राधिकानि गणना-प्रपत्राणि अङ्कीकृतानि। दिल्ल्याः मुख्य-निर्वाचनाधिकारिणः कार्यालयस्य अनुसारं, दिल्ल्यां मतदातृ-सूच्यां विशेष-गहन-पुनरीक्षणस्यांश-रूपेण प्रायः चतुर्दशसहस्राधिक त्रयस्त्रिंशत्-लक्ष-प्रपत्राणि अधुना यावत् वितरितानि सन्ति। सम्प्रति दिल्ल्यां मतदातृगणना-प्रपत्राणां प्रतिगृहं वितरणं प्रचलति। अन्तिममतदातृसूची अक्टूबरमासस्य सप्त दिनाङ्के प्रसारयिष्यते।

**क्रिकेट**

पुरुषाणां क्रिकेट्-प्रतिस्पर्धायां भारत-इङ्ग्लैण्ड-देशयोः मध्ये द्वितीया विंशति- प्रतिविंशति-अन्ताराष्ट्रियस्पर्धा अद्य मैनचेस्टर इत्यत्र भविष्यति। स्पर्धा भारतीयसमयानुसारं सायं सप्तवादने प्रारप्स्यते। चेस्टर-ले-स्ट्रीट इत्यत्र वृष्टिकारणात् पञ्चस्पर्धानां शृङ्खलायाः प्रथमा स्पर्धा निरस्तीकृता आसीत्। तृतीया स्पर्धा जुलाईमासस्य सप्तदिनाङ्के नॉटिंघम इत्यत्र क्रीडीष्यते। ब्रिस्टल-साउथेम्प्टन इत्येते नगरे विंशति-प्रतिविंशति-अन्ताराष्ट्रियशृङ्खलायाः अन्तिमयोः द्वयोः स्पर्धयोः आतिथ्यं करिष्यतः, यत् जुलाईमासस्य एकादशदिनाङ्के समाप्यते। एतदनन्तरं भारत-इङ्ग्लैण्ड-देशौ त्रिस्पर्धानाम् एकदिवसीयां अन्ताराष्ट्रिय-शृङ्खलां क्रीडीष्यतः।

**।। इति वार्ताः।।**